

॥ श्री शृङ्गेरी श्रीजगद्गुरुमहासंस्थानम् ॥

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य पदवाक्यप्रमाणपारावारपारीण
यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाध्यष्टाङ्गयोगानुष्ठाननिष्ठ
तपश्चक्रवर्त्यनाद्यविच्छिन्नश्रीशङ्कराचार्यगुरुपरम्पराप्राप्त षड्दर्शनस्थापनाचार्य
व्याख्यानसिंहासनाधीश्वर सकलनिगमागमसारहृदय सांख्यत्रयप्रतिपादक वैदिकमार्गप्रवर्तक
सर्वतन्त्रस्वतन्त्रादिराजधानी विद्यानगरमहाराजधानी कर्णाटकसिंहासनप्रतिष्ठापनाचार्य
श्रीमद्राजाधिराजगुरुभूमण्डलाचार्य ऋष्यशृङ्गपुरवराधीश्वर तुङ्गभद्रातीरवासि
श्री मद्विद्याशङ्करपादपद्माराधक श्रीजगद्गुरु श्रीमदभिनवविद्यातीर्थस्वामिगुरुकरकमलसन्जात

## ।। श्री जगद्गुरु शृङ्गेरी श्रीमद्भारतीतीर्थमहास्वामिभिः ।।

अस्मदत्यन्तप्रियशिष्य रङ्गनाथशर्मविषये नारायणस्मरणपुरस्सरं विरचिता आशिषस्समुल्लसन्तु ।

भवन्तः ऋक्संहितायां ध्वनिदीपिकां विरचय्य अस्मान् प्रादर्शयन् । सायणाचार्यैः विरचितानि आसेतुशीतनगं सकलशिष्टजनसमादृतानि अनवद्यानि चतुर्वेदभाष्याणि वेदार्थावगमे अत्यन्तमुपकारकाणि समुल्लसन्तीति सर्वेऽपि विदन्त्येव । सत्यप्येवं भवन्तः विवरणमिदं रचयितुमुद्युक्ता इति महदाश्चर्यं नः। अनेन भवदुद्यमेन भवतां ऋग्वेदमननं सम्पन्नमिति प्रतीमः। श्रीशारदाचन्द्रमौलीश्वरौ भवद्भ्यः श्रेयांसि समनुगृह्णीतामित्याशास्महे ।

इति नारायणस्मरणम्

शृङ्गगिरिः
शार्वरि आग्रहायणिकपूर्णिमा
सौम्यवासरः ३०.१२.२०२०